गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना ॥”
इति कर्म्मलोचनः ॥ * ॥
अथ मद्यपानां तुष्ट्यर्थं कौलानां मद्यपानविधिर्लिख्यते ।
“कुलाचाररतो वीरः कुलसङ्गी सदा भवेत् ।
सम्बिदासेवनं कुर्य्यात् सोमपानं महेश्वरि ! ॥
सर्व्वथा कुरुते देवि ! वीरश्चोद्धतमानसः ।
दिव्यस्तु देवताप्रायश्चन्दनागुरुलेपनैः ॥
रक्तचन्दनगन्धैश्च सुदिग्धो नात्र संशयः ।
भस्माङ्गधूसरो वीर उन्मत्तवद्विचेष्टितः ॥
सुरापानरतो नित्यं बलिपूजापरायणः ।
नरश्छागश्च महिषो मेषः शूकर एव च ॥
शशकः शल्लकी गोधा खड्गी कूर्म्मो दश स्मृताः ।
वानरश्च खरश्चैव गजाश्वादिविहङ्गमाः ॥
इत्यादेस्तु बलिद्दानैः पूजयेत् स्वेष्टदेवताम् ।
नित्यं नैमित्तिकं काम्यं प्रकुर्य्याच्च दिने दिने ॥
कुलवारे कुलर्क्षे च तिथौ च कुलके तथा ।
भैरव्याः कल्पितं चक्रं संस्थाप्य पूर्व्ववत् प्रिये ! ।
सुराणां शोधनं कुर्य्याद्यथावत् परमेश्वरि ! ॥
प्रवृत्ते भैरवीचक्रे सर्व्वे वर्णा द्विजोत्तमाः ।
निवृत्ते भैरवीचक्रे सर्व्वे वर्णाः पृथक् पृथक् ॥
विजयाश्चानुकल्पश्च द्विजो दद्याद्युगे युगे ॥”
इति उत्पत्तितन्त्रे ६३ पटलः ॥
“द्रव्याभावे चानुकल्पैः पूजयेत् परदेवताम् ।
सुराभावे च गोक्षीरं द्विजो दद्याद्युगे युगे ॥”
इति निरुत्तरतन्त्रे ५ पटलः ॥ * ॥
“असंस्कृतां सुरां पीत्वा ब्राह्मणो ब्रह्महा भवेत् ।
संस्कृतान्तु सुरां पीत्वा ब्राह्मणो व्यसदमिवत् ॥
सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत् सुराम् ।
अन्यत्र कामतः पीत्वा ब्राह्मण्यादेव हीयते ॥”
इति उत्पत्तितन्त्रम् ॥ * ॥
“ब्राह्मणस्य महामोक्षं मद्यपाने प्रियंवदे ! ।
ब्राह्मणः परमेशानि ! यदि पानादिकं चरेत् ।
तत्क्षणात् शिवरूपोऽसौ सत्यं सत्यं हि शैलजे ! ॥
तोये तोयं यथा लीनं तैजसं तेजसे यथा ।
घटे भग्ने यथाकाशं वायौ वायुर्यथा प्रिये ! ॥
तथैव मद्यपानेन ब्राह्मणो ब्रह्मणि प्रिये ।
लीयते नात्र सन्देहः परमात्मनि शैलजे ! ॥
सायुज्यादिमहामोक्षं निरुक्तं क्षत्रियादिषु ।
मद्यपानं विना देवि ! तज्ज्ञानं न लभ्यते ॥
अतएव हि विप्रस्तु मद्यपानं समाचरेत् ॥
वेदमाताजपेनैव ब्राह्मणो नहि शैलजे ! ।
ब्रह्मज्ञानं यदा देवि ! तदा ब्राह्मण उच्यते ॥
देवानाममृतं ब्रह्म तदेव लौकिकी सुरा ।
सुरत्वं भोगमात्रेण सुरा तेन प्रकीर्त्तिता ॥
मन्त्रत्रयं सदा पाठ्यं ब्रह्मशापादिमोचनम् ।
प्रकुर्य्यात्तु हि येनैव तदा ब्रह्ममयी सुरा ॥
हविरारोपमात्रेण वह्निर्दीप्तो यथा भवेत् ।
शापमोचनमात्रेण सुरा मुक्तिप्रदायिनी ।
अतएव हि देवेशि ! ब्राह्मणः पानमाचरेत् ॥
स ब्राह्मणः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः ।
बहु किं कथ्यते देवि ! स एव निर्गुणात्मकः ॥
मुक्तिमार्गमिदं देवि ! गोप्तव्यं पशुसङ्कटे ।
प्रकाशात् सिद्धिहानिः स्यात् निन्दनीयो न चान्यथा ॥”
इति मातृकाभेदतन्त्रे ३ पटलः ॥ * ॥
“कुलस्त्रीसेवनं कुर्य्यात् सर्व्वथा परमेश्वरि ! ।
रमते युवतीं रम्यां कामोन्मत्तविलासिनीम् ॥
नटीं कापालिकां वेश्यां रजकीं नापितां वराङ्गनाम् ।
शूद्राणीं स्वेच्छरमणीं जवनीं परमेश्वरि ! ॥
मातृयोनिविचारोऽस्ति मातृयोनिं विना प्रिये ! ।
कुलाचारपरो वीरः कुलपूजापरायणः ॥
भगलिङ्गसमायोगादाकृष्य जपमाचरेत् ।
निश्चलन्तु भवेच्चित्तं कोटिसूर्य्यग्रहेण किम् ॥
चले चित्ते भवेद्व्याधिर्निश्चले निश्चलं यथा ।
शवानां साधनं देवि ! लतासाधनमुत्तमम् ॥
चितायाः साधनं देवि ! सिद्धिरस्ति कलौ युगे ॥
इत्युत्पत्तितन्त्रम् ॥
कालिकातारिणीदीक्षां गृहीत्वा मद्यसेवनम् ।
न करोति नरो यस्तु स कलौ पतितो भवेत् ॥
वैदिके तान्त्रिके चैव जपहोमबहिष्कृतः ।
अब्राह्मणः स एवोक्तः स एव हस्तिमूर्खकः ॥
शुनीमूत्रसमं तस्य तर्पणं यत् पितृष्वपि ।
कालीतारामनुं प्राप्य वीराचारं करोति न ॥
शूद्रत्वं तच्छरीरेण प्राप्नुयात् स न चान्यथा ॥
इति कामाख्यातन्त्रे ५ पटलः ॥
मद्यशोधनप्रकारो यथा । शिव उवाच ।
शृणु पार्व्वति ! वक्ष्यामि तेषां वै शोधनक्रियाम् ।
पद्मासनेन संविश्य करपुटं समाचरेत् ॥
वामे गुरुन्नमस्कृत्य दक्षिणे गणपतिं स्मरेत् ।
मध्ये देवीं नमस्कृत्य प्राणायामत्रयञ्चरेत् ॥
शरीरे मातृकां न्यस्य ऋष्यादिन्यासमाचरेत् ।
स्वकल्पोक्तविधानेन षड़ङ्गन्यासमाचरेत् ॥
पश्चाद्भूमौ त्रिकोणं वा षट्कोणं वा महेश्वरि ! ।
विलिख्य मण्डलं शुद्धं तस्योपरि घटं न्यसेत् ॥
बहुधा प्रोक्षणं कृत्वा फट्कारेण पुनः पुनः ।
ततस्तस्मिन् कारणन्तु स्तवेनैव च स्थापयेत् ॥
मातृकार्णेन देवेशि ! विपरीतेन चैव हि ।
पुनः फट्कारमन्त्रेण प्रोक्षणं कारयेत् सुधीः ॥
ततो वियच्छक्तिबीजं चतुर्द्दशस्वरान्वितम् ।
नादबिन्दुयुतं कृत्वा तस्योपरि शतं जपेत् ॥
ततो मूलं जपेन्मन्त्रं मायाबीजं ततः परम् ।
धेनुं योनिं गालिनीञ्च त्रिखण्डं मीनसंज्ञकम् ।
दर्शयित्वा वरारोहे ! घटं धृत्वा पठेन्मनुम् ॥
ॐ एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥
ॐ सूर्य्यमण्डलसम्भूते वरुणालयसम्भवे ।
अमाबीजमये देवि ! शुक्रशापाद्विमुच्यताम् ॥
ॐ वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि ।
तेन सत्येन ते देवि ! ब्रह्महत्यां व्यपोहतु ॥
ततः षड़ङ्गयुक्तञ्च वकारं बिन्दुसंयुतम् ।
एवं सकारकञ्चापि वर्णाक्षरसमन्वितम् ॥
जप्त्वा मन्त्री ततो ध्यायेत् स्वमन्त्रं कुलसुन्दरि ! ।
आनन्दभैरवं ध्यायेद्यथा तन्त्रानुसारतः ॥
रक्तवर्णं चतुर्बाहुं त्रिनेत्रं वरदं शिवम् ।
जटाजूटधरं देवं वासुकीकण्ठभूषितम् ॥
डमरुञ्च कपालञ्च मुद्गरं पाशमुत्तमम् ।
धारिणं तं यजेद्देवं व्याघ्रचर्म्माम्बरं शिवम् ॥
एवं ध्यात्वा महेशानि ! तस्य मध्ये प्रपूजयेत् ।
मायाबीजं ततो हुं फट्मन्त्रेणानेन संत्यजेत् ॥
ततस्तस्मिन्महेशानि ! आनन्दभैरवीं स्मरेत् ।
आनन्दभैरवीं देवीं वराभयलसत्कराम् ॥
घोररूपां वरारोहां त्रिनेत्रां रक्तवाससम् ।
रक्तवर्णां महारौद्रीं सहसभैरवान्विताम् ॥
ब्रह्मविष्णुमहेशाद्यैः स्तूयमानां शिवां भजे ।
इति ध्यात्वा महेशानि ! तेनैव मनुना यजेत् ॥
तयोरैक्यं विभाव्यैव गायत्रीं दशधा जपेत् ।
भैरवं ङेऽन्तकञ्चोक्त्वा विद्महे तदनन्तरम् ॥
सुधादेव्यै ततः पश्चाद्धीमहीति ततो वदेत् ।
तन्नो देवी ततः पश्चात्तदन्ते च प्रचोदयात् ॥
इति ते कथिता देवी गायत्री परमाक्षरी ।
तस्याः स्मरणमात्रेण द्रव्यशुद्धिश्च जायते ॥
तस्य प्रसादादीशोऽहं सत्यं सत्यं न संशयः ।
तस्य मध्ये मूलमन्त्रं विलिखेद्धेलिखेत् सकृत् ।
रक्तवस्त्रेण संपूज्य सुधां वस्त्रेण गोपयेत् ॥ * ॥
धर्म्मार्थकाममोक्षाणां विषयाणाञ्च पार्व्वति ! ।
सर्व्वेषां कारणं यस्मात् कारणं परिकीर्त्तितम् ॥
अस्माकञ्च महेशानि ! शरीरकारणं हि तत् ।
मृत्युञ्जयोऽहं वीरेशि ! वीरकार्य्यप्रसादतः ॥
निर्व्विकारेण देवेशि ! निर्व्विकल्पेन चेतसा ।
सेव्यमानं कुलं भद्रे ! भुक्तिमुक्तिप्रदायकम् ॥
निर्व्विकल्पो महेशानि ! मुक्तिभागी न संशयः ।
सविकल्पो वरारोहे ! रौरवं याति निश्चितम् ॥”
इति कैवल्यतन्त्रे २ पटलः ॥
(वैद्यकोक्तदोषादि यथा,—
“तीक्ष्णोष्णरूक्षसूक्ष्माम्लं व्यवायाशुकरं लघु ।
विकाशि विशदं मद्यमोजसोऽस्माद्विपर्य्ययः ॥
तीक्ष्णादयो विषेऽप्युक्ताश्चित्तोपप्लाविनो गुणाः ।
जीवितान्ताय जायन्ते विषे तूत्कर्षवर्त्तिनः ॥
तीक्ष्णादिभिर्गुणैर्मद्यं मन्दादीनोजसो गुणान् ।
दशभिर्दशसंक्षोभ्य चेतो नयति विक्रियाम् ॥
आद्ये मदे द्वितीये च प्रमादायतने स्थितः ।
दुर्व्विकल्पहतो मूढ़ः सुखमित्यधिमुच्यते ॥
मध्यमोत्तमयोः सन्धिं प्राप्य राजसतामसः ।
निरङ्कुश इव व्यालो न किञ्चिन्नाचरेज्जड़ः ॥
इयं भूमिरवद्यानां दौःशील्यस्येदमास्पदम् ।
एकोऽयं बहुमार्गाया दुर्गतेर्देशिकः परम् ॥
निश्चेष्टः शववच्छेते तृतीये तु मदे स्थिताः ।
मरणादपि पापात्मा गतः पापतरां दशाम् ॥
धर्म्माधर्म्मसुखं दुःखमर्थानर्थं हिताहितम् ।
यदासक्तो न जानाति कथं तच्छीलयेद्बुधः ।
मद्ये मोहो भयं शोकः क्रोधो मृत्युश्च संश्रिताः ।